# Shishupalakritam Shri Krishna Stotram

# शिशुपालकृतं श्रीकृष्णस्तोत्रम्

## Document Information

Text title : Shishupalakritam Shri Krishna Stotram

File name : shishupAlakRRitaMshrIkRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, brahmavaivartapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : brahmavaivartapurANa | shrIkRRiShNajanma, uttarabhAga | adhyAya 113/29-34||

Latest update : March 29, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 29, 2025

*sanskritdocuments.org*

# शिशुपालकृतं श्रीकृष्णस्तोत्रम्

शिशुपाल उवाच ।
वेदानां जनकोऽसि त्वं वेदाङ्गानां च माधव ।
सुराणामसुराणां च प्राकृतानां च देहिनाम् ॥ २९॥

सूक्ष्मां विधाय सृष्टिं च कल्पभेदं करोषि च ।
मायया च स्वयं ब्रह्मा शङ्करः शषे एव च ॥ ३०॥

मनवो मुनयश्चैव देवाश्च सृष्टिपालकाः ।
कलांशेनापि कलया दिक्पालाश्च ग्रहादयः ॥ ३१॥

स्वयं पुमान्स्वयं स्त्री च स्वयमेव नपुंसकः ।
कारणं च स्वयं कार्यं जन्यश्च जनकः स्वयम् ॥ ३२॥

यन्त्रस्य च गुणो देषो यन्त्रिणश्च श्रुतौ श्रुतम् ।
सर्वे यन्त्रा भवान्यन्त्री त्वयि सर्वं प्रतिष्ठितम् ॥ ३३॥

मम क्षमस्वापराधं मूढस्य द्वारिणस्तव ।
ब्रह्मशापात्कुबुद्धेश्च रक्ष रक्ष जगद्गुरो ॥ ३४॥

इत्येवमुक्त्वा क्रमतो जयो विजय एव च ।
मुदा तौ ययतुः शीघ्रं वैकुण्ठद्वारमीप्सितम् ॥ ३५॥

इति श्रीब्रह्मवैवर्तपुराणे श्रीकृष्णजन्मखण्डे उत्तरे
त्रयोदशाधिकशाततमाध्यायान्तर्गतं शिशुपालकृतं
श्रीकृष्णस्तोत्रं समाप्तम् ।

ब्रह्मवैवर्तपुराण । श्रीकृष्णजन्म, उत्तरभाग । अध्याय ११३/२९-३४॥

brahmavaivartapurANa . shrIkRRiShNajanma, uttarabhAga . adhyAya 113/29-34..

Proofread by PSA Easwaran

*Shishupalakritam Shri Krishna Stotram*

pdf was typeset on March 29, 2025

Please send corrections to *sanskrit@cheerful.com*